सप्तपदीहृदयदिशा - सप्तपदीक्रियायाः विमर्शः

Dr. V.V. Anilkumar
Asst.Professor, Sree Sankara College, Kalady

Abstract

यज्ञभावनया विधीयमानकर्मानुष्ठाननिर्देशपरेषु वेदभागेषु षोडशसंस्काराणां विशदवर्णना द-रीदृश्यते । दोषापनयनं , गुणाधानञ्च तादृशसंस्काराणामुद्देशः । उक्तञ्च ब्रह्मसूत्रभाष्ये शङ्कराचार्यैः - "संस्कारो हि नाम गुणाधानेन वा स्यात् दोषापनयनेन वा" इति । [1] गृह्यसूत्रेषु संस्काराणां विहितत्वं विद्यते, यानि वेदाश्रयत्वेन विद्यमानानि । भिन्नभिन्नाचार्याणां मते संस्काराणां संख्या बहुप्रकारेण वर्तते तथापि मुख्यतया षोडशसंस्काराः प्रथिताः । ते च गर्भाधानम् . पुंसवनं, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम् ,चूडाकर्मकर्णवेधः, उपनयनम्, वेदारम्भः, समावर्तनम्, विवाहः, वानप्रस्थः,सन्यासः, अन्त्येष्टिः इत्यादयः एव इति दयानन्द-स्वामिना निर्दिष्टम् । गर्भादानादारभ्य अन्त्येष्टिपर्यन्तं विहितानां संस्काराणां मध्ये विवाहस्य उत उद्वाहस्य प्राथम्यमस्ति । विवाहसंस्कारेऽपि बहुक्रियानिर्देशः अस्ति । गोदान-कन्यादान-लाजहोम-यज्ञकुण्डप्रदक्षिणसप्तपदी सूर्या वारुन्धतीदर्शनप्रदर्शनप्रभृतिविहितविधीनां प्रयोजनं माहात्म्यं च सम्यगवगन्तव्यमेव तत्रान्यतमायाः सप्तपदीक्रियायाः विचारः अत्र क्रियते ।

Keywords— विवाहः, विवाहसंस्कारः, सप्तपदी, इषः, ऊर्णः, रायस्तोषः, मयोभावः, सप्तपदीहृदयम्

1 विवाहः

विवाहः विशिष्टं वहनं विवाहः इति शब्दकल्पद्रुमे । यस्य कस्यापि वस्तुनः विशिष्टं वहनं विवाहं भवति , तथापि विवाहशब्दो योगरूढित्वेन दारपरिग्रहरूपार्थमेव निर्दिश्यते । विवाहशब्दस्यार्थः बहुधा समर्थितः । उपायतः प्राप्तायाः कन्यायाः दारकर्मणार्थः संस्कारः पाणिग्रहणलक्षणः इति मेधातिथिः मनुस्मृतिभाष्ये ।
विवाहः भार्याप्राप्तिहेतुः इति कुल्लूकभट्टः मनुस्मृतिव्याख्याने ।
दारापरिग्रहे तज्ज्ञनके व्यापारे च इति वाचस्पत्ये
उपयामः परिणयनं पाणिग्रहणं विवाहऋ उद्वाहः इति हलायुधकोशे ।। सन्तानोत्पत्तये वर्णाश्रमानुकूलमुत्तमकर्म-सिद्धये च स्त्रीपुरुषयोः सम्बन्धः इति दयानन्दः । अर्थात् पाणिग्रहणलक्षणे विशिष्टवाहनार्थे विवाहशब्द इत्यर्थः । विवाहभेदाः मनुप्रमाणपरिकल्पितत्वेन विवाहानां अष्टविधत्वं परिगृहीतं भवति। ब्राह्म-दैव-आर्ष-प्राजापत्य-आसुर-गान्धर्व-राक्षस-पैशाचाः अष्टविवाहप्रकाराः । तत्र दैवार्षप्राजापत्यविवाहानामेव प्राधान्यमिति विदामभि-प्रायः। विभिन्नगृह्यसूत्रेषु विवाहसंस्कारस्य विभिन्नाः विधयः प्रतिपादिताः । आश्वलायनानां त्रयोविंशतिः तथा बौधायनानां एकविंशति, आपस्तम्बीयानां त्रयोविंशति गोभीलानां एकोनचत्वारिंशत् विधयः निर्दिष्टाः सन्ति । स्थालीपुलाकन्यायेन आश्वलायनानां विधयः सूच्यन्ते । पाणिग्रहणम्, अग्निपरिक्रमणम् , अश्मारोहणम्, लाज-होमः, शिखामोक्षणम्, सप्तपदी, मूर्धाभिषिञ्चनम्, ध्रुवादिदर्शनम्, यानारोहणम्, नावारोहणम्, उदकादुत्तरायणम्, वधूरोधने मन्त्रपाठः, मन्त्रजपः, सुमङ्गलीदर्शनम्, गृहप्रवेशः, वृषभचर्मारोहणम्, चतस्राज्याहुतयः, दधिप्राशनम् , आज्येन हृदयाञ्चनम्, ब्रह्मचर्याधारणम्(नियतकालम्), वधूवस्त्रदानम्, ब्राह्मणेभ्यो अन्नदानम्, स्वस्तिवाचनम् । शांखायनबाराहशादिरादिगृह्यसूत्रेष्वपि भिन्नप्रकारेण विधयो वर्णिताः भवन्ति। तन्मध्ये सप्तपदीक्रियायाः महत्वं गाम्भीर्यं चात्र निरूप्यते। सप्तपदीक्रिया जगतः समस्तकल्याणाय आचार्यैः स्थापिते विवाहाभिधाने सर्वोत्तमं कर्म भवति सप्तपदी नाम । अस्य कर्मणः समाप्तावेव विवाहस्य अच्छेद्यता संभवति । अतः सर्वश्रेष्ठं कर्मेदं आचार्याः । वरः सप्तपदानि वधूं स्वात्मना सह सञ्चालयति । सप्तपदसञ्चालनमिदं सप्तश्रेष्ठलोकजयसूचकम्

[1] B.S.1.1.4

। तत्पर्यन्तमैकमत्येन सह गच्छतो: पूर्णमित्रभावो संजायते । कुमारसम्भवे 'साप्तपदीनं सख्यमिति निर्दिष्टम् । पुरुषः स्वसात्याय स्वात्मनः आनन्दपरिपूर्णाय च स्त्रियं सप्तधा प्रतिश्रुत्य सप्तलोकविजयाय स्वात्मानं पूर्णत्वेन प्रतिज्ञाप्य च दारेण सह पूर्णमित्रभावं स्थापयति इति अस्या: क्रियायाः सामान्यार्थः । षट्चक्राण्यतिक्रम्य कुण्डलिनीशक्तेः सहस्रारपद्मप्रवेश एवाऽत्र सूच्यतेति तान्त्रिकविदः । एवं बहुभिः प्रकारैः निरूप्यमाणेदं कर्म किमर्थं कथं विधीयते । तद्विधानस्य च कोऽत्र सारेति च अत्र विमृश्यते ।

2 क्रियास्वरूपम्

वरवध्वोः उत्तरीयवस्त्रग्रंथनमेव ग्रन्थिबन्धनम् । ततः वधूवरौ आसनादुत्थाय यज्ञकुण्डस्य उत्तरभागं गच्छतः । तदा वर: निजदक्षिणहस्तेन वध्वाः दक्षिणहस्तं गृह्णाति । ततः तं हस्तं वध्वाः दक्षिणस्कन्धे निदधाति अन्योन्याभिमुख्येनोपतिष्ठतः। ततः वर: "मा सख्येन दक्षिणमतिक्राम" इति मन्त्रमुच्चार्य वधूं दक्षिणेन पदा चलितुमादिशति । एकैकशः एकैकं मन्त्रोच्चारणपुरस्सरम् ईशानदिशं प्रति वध्वा सह सप्तपदानि चलति । एकैकशः प्रतिमन्त्रोच्चारणं सप्तपदीं कुर्यात् इति विधिः । सप्तपद्याः मन्त्राः इमे सन्ति । इषे एकपदी भव सा मामनुव्रता भव । विष्णुस्त्वान्नयतु पुत्रान् विन्दावहै बहुंस्ते सन्तु जरदष्टयः ऊर्जे द्विपदी भव रायस्पोषाय निपदी भव मयोभवाय चतुष्पदी भव प्रजाभ्यः पञ्चपदी भव ऋतुभ्यः षट्पदी भव सखा सप्तपदी भव इति। अन्नं, बलं, धनं, सुखं पुत्रप्राप्तिः ऋतुकूलता सखित्वं च प्रतिपदनिक्षेपभावनया अत्र वध्वे उपदिश्यते । ते मन्त्राः अत्र विचार्यन्ते ।

इषे एकपदी भव गार्हस्थ्यजीवनोन्नत्यै कर्तव्यताविषये वरः वधूं एवं बोधयति । अत्र इषेत्यनेन अन्नप्राप्तिः निर्दिश्यते । जीवनाय आवश्यकं सर्वाधिकं भवति अन्नम्। अन्नस्य प्राधान्य उपनिषत्सु दृश्यन्ते । अन्नात् भवन्ति भूतानि .....etc. इतराश्रमिणां आधारो भवति गृहस्थाश्रमः । सर्वेषां भूत्यै गृहस्थः उपतिष्ठेत् इति नियम: । तत्र अन्नस्य प्राथम्यमस्ति अन्नं विना गृहस्थस्य सुखं नेधते । अन्नेन प्रवीणा: लोके सुखमनुभवन्तीति प्रसिद्धिः । अन्नप्राप्तै त्वं सदा भावनां कुर्यादिति मन्त्राशयः । आशयमिममुपसंगृह्य आचार्यामृतवाग्भवः तयो: सम्भाषणरूपेण एवमालेखितं भवति । वर: - मदतिथिगुरुपुत्रभ्रातृवर्गं समस्तं विविधविधिविधानैः साधितैरन्नपानै: इह हि परिचरन्ती माननीया स्वराष्ट्रे भवसि जयसि लोकं मद्गृहरूया सुखाशे ।

वधु: - तवार्जितैरन्नवरैः सुरक्षैः सुपाचितैस्त्वां परितोषयामि । तव स्ववर्गं च समस्तमेव त्वदाज्ञया साधु समाजयामि ।। इति।

समस्तहितप्राप्त्यर्थं त्वदाज्ञयाहम् अन्नपाकेन परितोषयामि इति वधो: प्रतिज्ञा ।

ऊर्जे द्विपदी भव अत्र ऊर्जपदस्य बलमिति भाव: । दाम्पत्यजीवने शरीरमनसोः बलमावश्यकं विद्यते । बलवन्तः एव बलहीनै: सेव्यते । बलवताम् एव सन्तानोत्पत्तिः । बलं च संयमितजीवनेन शुद्धाचारविचारेण प्रयत्नेन च प्राप्यते । विषयासक्तिराहित्यं शुद्धमनः, परिश्रमः च यथाबलं कुर्यादिति उपदेशः । ऊर्जपदस्य प्राण इत्यप्यर्थ: । प्राणबलेनोपेता भव इति निर्देश: ।

आशयमिमम् आचार्यः एवं प्रतिपादयति । शौचाचारविचारसाधितपरीणाहेव सम्पोषितः स्वो वर्गोऽहमपि प्रसन्नहृदयः साराङ्गयष्टिः सदा । ऊर्जस्वि प्रभवामि कर्तुमखिलं राष्ट्रं स्वकीयं महत् तास्माद्यारुहढाङ्गशोभिनि भुवर्लोकं मया यास्यसि । ऊर्जे नयाम्यहं विष्णु- स्त्वां चारुदृढविग्रहे पदद्वयमिति प्रोक्ते पत्न्या प्राह वधूरिदम्।

वधुः - यथाबलं त्वद्गृहपरिणाह्यं परीक्ष्य शौचादिविधानतोऽहम् ऊर्जप्रदं रोगहरं त्वदर्थे कुटुम्बपुष्ट्यै परिसाधयामि । रोगविहीनोर्जप्रदत्वेन त्वत्कुटुम्बपुष्ट्यै अहं प्रयतामि इति वधोः प्रतिज्ञा ।

रायस्पोषाय विपदी भव

रायस्पोषो नाम धनसमृद्धिः । ऋते धनैश्वर्यं गृहस्थजीवितं नरकायैव । अथर्ववेदम् अत एव उक्तम् [2]अ युवं भगं संभरतं समृद्धम् इति । मितव्ययेन आयेन च धनपरिपालनं योग्यं भवति। अतः वध्वा कलावैशद्येन, धनमार्जनीयं मितव्ययेन परिरक्षणीयम् इत्यादेशः । न केवलं भौतिकज्ञानसमृद्धिः आत्मीय सम्पत्तिरपि अनेन निर्दिश्यते । रागाद्यज्ञानजनकविकाराणां यथाशक्ति निर्माजनं विवेकज्ञानादेव जायते। तद्विवेकः समार्जनीयः इति निर्देश: । वधू ज्ञानवती विवेकशीला च स्यादित्याशयः ।

आशयोऽयम् एवमाचार्यैः संगृहीतः भवति; वर: - द्रव्यक्षेमविचारभारमखिलं दत्वा त्वदीये करे नानोपायविधानत: स्वयमहं द्रव्याणि संप्रार्जयन् स्वं राष्ट्रं धनपूरितं विरचयन्नर्थज्ञधुर्ये शुभे स्वर्लोकं प्रभवामि जेतुमिह हि प्राज्ये स्वराष्ट्रे त्वया ।

रायस्पोषाय विष्णुस्त्वां अर्थविज्ञे नयाम्यहम् । पदत्रयमिति प्रोक्ते पत्न्या प्राह वधूरिदम् ।

[2]B.S.20.126.9

वधुः - गाहस्थ्यसाधनसमस्तपदार्थवर्ग मूलं धनं विधिवदार्जितमस्ति यत्ते । आयव्ययादि सुपरीक्ष्य निदेशतस्ते त्वत्प्रीतये बहुविधं परिवर्धयामि ॥

आर्य त्वदादेशानुसारेण आयव्ययादीनां स्वरूपं विज्ञाय त्वत्प्रीतये धनमहं परिवर्धयामि इति प्रतिज्ञा।

मयोभव भवाय चतुष्पदी भव

अत्र मयःशब्देन अनामयं सुखं च विवक्षितः । यत्र अनामयत्वं तत्र सुखमिति । गृहस्य सुखं गृहिण्यौ निक्षिप्तं भवति । अतः एव गृहिणी गृहमुच्यते इति उक्तिः । परिवारस्य सुदीर्घजीवनम् आरोग्यं च त्वया परिरक्षणीयम् इति निर्देशः । वध्वधीनं भवति गाहस्थ्यसौख्यम् । तदर्थं भर्ता तां प्रेरयति । आशयमिमं आचार्यमृतवाग्भवः एवं वक्ति वरः - संरक्षां ननु पारिणाह्यविषयां सौख्यप्रदानोद्धुरे नानाऽऽशांसितवस्तुसंग्रहधुरामारोप्य शीर्षे तव । तत्तत्सौख्यनिमित्तवस्तुभरितं राष्ट्रं समृद्धं स्वकं कुर्वन्कीर्तिमवाप्नुवन्निह महर्लोकं जयामि त्वया ।।

मायो भवाय विष्णुस्त्वां सुखविज्ञे नयाम्यहम् चतुष्पदमिह प्रोक्ते पत्या प्राह वधूरिदम् ।

वधुः - आवश्यकानि विविधानि गृहे त्वदीये वस्तूनि यानि गृहिणां सुखसाधनानि । तेषामहं समुदयं विरचय्य नूनं त्वामात्मवर्गसहितं सुखयामि शश्वत् ।

गृहस्थानां सुखसाधनविरचनद्वारा त्वां सदा सुखयाम्यहं इति वधोः प्रतिज्ञा ।

प्रजाभ्यः पञ्चपदी भव

मन्त्रेणानेन वरः वधूं प्रजाभ्यः प्रेरयति । अनपत्यस्य एव गाहस्थ्यजीवने कलङ्कत्वेन वरीवर्ति । उक्तञ्च अच्छायश्चैकशाखश्च निष्फलश्च यथा द्रुमः । अनिष्टगन्धश्चैकश्च निरपत्यस्तथा नरः ॥ इति निष्फलमिदम् अपुत्राणां कुटुम्बिनां निष्फलोऽयं जन्म । दशास्यां पुत्राना धेहि' इत्यनेन बहु सन्ततिलाभः जीवने युक्तमिति वरः वधुं बोधयति - आचार्यामृतवाग्भवः एवमाशयमिमं विवृणोति-

मेधाकान्तिबलाऽऽगदत्वरचनं गव्यं परं कारणं तन्मूलं पशुवृन्द्रपालनमतस्त्वां तद्व्यवस्थापने । वार्ताज्ञे विनियोज्य राष्ट्रमरणे कुर्वन् प्रयत्नं सदा जानं लोकमहं त्वया सह पुनर्जेष्यामि शत्रुशये ।

पश्वर्थं विष्णुरूपो हे वार्ताज्ञे त्वां नयाम्यहम् । पदपञ्चकमित्युक्ते पत्या प्राह वधूरियम् ।

गोपूजा हि विष्णुपूजा । विष्णोरनुग्रहादेव पुत्रप्राप्तिः यथा गोकर्णः साध्वनुग्रहेण संजातः तथा वयमपि पूज्यवस्तुपूजनेन सिद्धार्थाः भविष्याम इति निर्देशः ।

वधुः - दधिदुग्धघृतादिसाधनं कृषिवाणिज्यनिमित्तमस्ति यत् सुखदं परमं कुटुम्बिनां पशुवृन्दं परिपालयामि तत् ।

गोरसपरिपालनद्वारा गृहसुखमप्यहं पोषयामि इति वधोः प्रतिज्ञा ।

ऋतुभ्यो बहुपदी भव

ऋतुशब्देन अत्र गरनुगामित्वं सूच्यते । ऋतुस्तावत् मासद्वयकालविशेषः । अर्थात् कालपरिज्ञानम् अवश्यंभावी । आयुर्वेद दिनचर्या ऋतुचर्यारूपेण अनुकूलप्रतिकूलवस्तुविषयाणां विस्तारः क्रियते । एवं ऋतुकालपरिज्ञानेन वस्तूनां हेयोपादेयविज्ञानमवगम्य व्यवहारं कुरु इति पत्युर्निदेशः।

आचार्य एवं संग्रह्णति :- आत्मायं परमो बहिर्मुखमहाऽऽनन्दाय बद्धीकृत स्तस्मात्वां परिणीय चित्तरचितं सर्वर्तुसौख्यं भजन राष्ट्रप्रीणनतत्परं सुयशसं वंशं प्रतिष्ठापयन् जेष्यामि प्रथितं त्वया सह तपोलोकं विशुद्धाशये ।

विशुद्धकामने विष्णुः ऋतुभ्यस्त्वां नयाम्यहम् पदषट्कमिति प्रोक्ते पत्या प्राह वधूरिदम् ।

वधुः - अद्वैतभावमुपगम्य तवाज्ञयैव तत्तद्ऋषीकसुखसाधनतामुपेता सर्वासु तासु ऋतुषु हि त्वयि बद्धभावा त्वामर्चयामि नितरां परितोषयामि ।

बहिर्मुखानन्दरमणशीलतामुपेक्ष्यात्मीयानन्द सौभाग्यवती भवेन्यादेशमुपश्रुत्य कालस्वरूपस्येश्वरस्य विज्ञानेन अद्वैतभावमुपगम्य त्वां परितोषयाम्यहमिति वधोः प्रतिज्ञा । सखा सप्तपदी भव

सख्याय सप्तपदी सप्तमं पदं निधेहि इति पत्युर्निदेशः । सर्वव्यापकः विष्णु त्वां नयतु इति प्रार्थना । अत्र सखी इति पदेन पत्नी दासी न भवति अपि तु सखी एव इति सूचयति । पतिपत्न्योः समानहृदयत्वं, विचारः विकारः कर्माणि च परिवारस्य सुखाय भवति । अतः पत्नीं प्रति तादृशभावनायुक् स्यादिति भर्तुरादेशः ।

आचार्य एवं आशयमिमं विशदयति ; सख्यं सप्तपदीनमत्रमुनयः सम्पूर्णमाहुः सदा तेन त्वामभिगम्य सप्तममहं लोक जयामि ध्रुवम् मोक्षार्थं हृदयं विधाय भवती राष्ट्रस्य सम्भावने मामेवानुगता भविष्यति तदा मोक्षे न ते दुर्लभः ।।

वध्वाः प्रतिश्रुतं ज्ञात्वा पतिः प्राहैवमुत्तमम् । सखे सप्तपदा भव सा मामनुव्रता भव ॥

वधुः - प्राप्तं मया मनुजदेहफलं समस्तं यत्सौख्यमुत्तममहं भवना गताऽद्य सर्वं प्रतिश्रुतमिदं हृदये दधाना त्वामेव पूर्णहृदयेन नु कामयिष्ये ।

सप्तपदीकर्माचरणेन त्वत्सौख्यं प्राप्ताहं त्वां हृदये विधाय पूर्णहृदयेन भजिष्यामि इति वधोः प्रतिज्ञा ।

सखा सप्तपदी भव

सख्याय सप्तपदी सप्तमं पदं निधेहि इति पत्युर्निदेशः । सर्वव्यापकः विष्णु त्वां नयतु इति - प्रार्थना ।

उत्तमगृहस्थाश्रमप्राप्तये एव निर्देशोऽयं । चरैवेति चरैवेति इति ऐतरेयब्राह्मणवाक्यं जीवनस्य आधार: स्यात् । जीवितयानस्य द्वे चक्रे भवतः वधूवरौ । एकं विहाय अन्यः चलने न शक्तः । उभयोः आनुकूल्ये सञ्चलनं सुखकरं स्यात् । सा मा मनुव्रता भव इत्यनेन वधुः पतिव्रता भवेदिति प्रार्थना सर्वेषां पथप्रदर्शक: विष्णुः जीवनपथे सारथिः स्यादिति अस्य मन्त्रस्य आशयः ।

3 सप्तपदीक्रियायाः रहस्योद्देश:

सप्तपद्यां मा सव्येन दक्षिणमतिक्राम इति नियमः निर्दिष्टः । वधुः प्रथमं दक्षिणं चरणमग्रे स्थापयति तत्पश्चात् वामपदम् । वामपादेन दक्षिणपाद: न अतिक्रमणीय: । यतः दक्षिणचरण एव अग्रगामी स्यात् । एवं वधू गार्हस्थ्यजीवने दक्षिणपादाङ्किता कर्मसु दशा भवेत् । वामचारिणी न स्यादिति सूच्यते ।

ईशानदिशं प्रति सप्तपदीविधौ गमनं निर्दिष्टम् । पूर्वोत्तरदिशोरन्तराल एव ईशानदिक् । सूर्यसोमौ पूर्वोत्तरदिगधिपौ तेजस्विनौ च । वरवध्वौ गाहस्थ्यजीवने प्रकाशस्वरूपिणौ सत्वगुणिनौ च भवेताम् इति निष्कर्ष: ।

4 Conclusion

चतुर्दशभुवनेषु सप्तमा भवति भूमिः । भूमे: संख्या भवति सप्त । ऊर्ध्वगमनमेव जीवाभिलाष: । अत: भूमेदारभ्य भुवस्वर्महर्जनस्तपस्सत्यलोकपर्यन्तं जीवितयानं कथं सञ्चालनीयमिति साप्तपदीनविधिद्वारा अत्र निर्दिष्टं भवति । वैदिकमन्त्राणां अर्थावगमनाविरहात् अनर्थग्रहणात् च दाम्पत्ये अस्वारस्यम् संभवति । सकललोककल्याणाय प्रवृत्तेषु वेदेषु येन प्रकारेण निनर्देश: तेन प्रकारेण जीवनयापनं करिष्यति चेत् सफलम् आनन्दपूर्णं च स्यात् जीवनम् । अतः साप्तपदीनक्रियायाः हृदयरूपेण आचार्यमृतवाग्भवेन श्रीसप्तपदीहृदयमनुसृत्य वैदिकाकां गार्हस्थजीवनोपयुक्तमन्त्राणां विचारः कृतः । तल्लोकोपकाराय भवतु इति प्रार्थये ।

सप्तपद्यां वरवध्वो: क्रियमाणाः सप्तप्रतिज्ञाः गृह्यसूत्रेषु संक्षिप्ततया सूचिताः भवन्ति । तानाशयान् हृदयभावेन अनुभूय मनोहरपद्यभावेन विशदीक्रियन्ते श्रीसप्तपदी हृदयमिति ग्रन्थे आचार्यश्रीमदमृतवाग्भवेन चतुर्विंशतिश्लोकात्मकोऽयं ग्रन्थः । उक्तञ्च

श्रीसप्तपदीहृदयं प्रणीय शास्त्रानुकूलमर्थज्ञः वाञ्छति विश्वोद्धारं श्रीमदमृतवाग्भवाचार्यः ।।

Reference

1. Grhastharatnakarah, Dr Neena Dogra, Nag Prakash, New Delhi, 1998.
2. Kalyanakalpatharu, Bhakti Number, Geeta Press, Gorakhpur, 2017.
3. Rajayoga, Vivekananda, SreeRamakrishna Mutt, Trissur, 2015.
4. Vaidika Sukta Samgraha, Geeta Press, Gorakhpur, 2009.
5. Mantrarahasya, Dr Narayanadutta Srimali, VSPublishers, New Delhi, 2014.
6. Brahmasutaram, Badarayana, Chowkhamba sanskrit sansthan, Varanasi, 1972.
7. SriSaptapadi Hrdayam, Acharya AmrutaVagbhavah, (Manuscript Notebook form).